http://www.sgbaonline.com/



# B.A. (Part–II) Examination
## (Classic Indian Language)
## SANSKRIT
## (Compulsory Languages)

Time : Three Hours] [Maximum Marks : 70

**Note :—** Write answers in the medium offered.

**सूचना :—** स्वीकृत माध्यमात उत्तर लिहा.

**सूचना :—** स्वीकृत माध्यम में उत्तर लिखें।

1. (A) Translate any **ONE** of the following :— 10

कोणत्याही **एकाचा** अनुवाद करा :—

किसी **एक** का अनुवाद कीजिए :—

(i) तच्छ्रुत्वा सहस्त्रबुद्धिः प्रहस्य आह – भोः मित्र, मा भैषीः। यतो वचनश्रवणमात्रादेव भयं न कार्यम्। न भेतव्यम्

सर्पाणां च खलानां च सर्वेषां दुष्टचेतसाम्।
अभिप्राया न सिद्ध्यन्ति तेनेदं वर्तते जगत्।।

तत्तावत्तेषामागनमपि न संपत्स्यते। भविष्यति वा तर्हि त्वां बुद्धिप्रभावेणात्मसहितं रक्षयिष्यामि। "यतोऽनेकां सलिलंगतिचर्यामहं जानामि।" तदाकर्ण्य शतबुद्धिराह–"भोः युक्तमुक्तं भवता, सहस्त्रबुद्धिरेव भवान्।" अथवा साध्विदं उच्यते-

"बुद्धेर्बुद्धिमतां लोके नास्त्यगम्यं हि किञ्चन।
बुद्ध्या यतो हता नंदाश्चाणक्येनासिपाणयः।"

(ii) शंभुराज : कविणी, अस्मद्विषयकः, पूर्वग्रहः अस्मद्विषयको वैरभावोऽपि शक्यः अवगन्तुम्। किं तु तेन अवधीभूता एते प्राज्ञमन्या नीतिनिपुणा वस्तुतः कस्य दण्डम् आचरन्ति, कस्य वा पुण्यश्लोकस्य महान्तं संकल्पं धूलिसात् कुर्वन्ति, इत्येतदपि तावद् विचार्यताम्। ननु च भोः अस्मद्राज्यश्रियः ग्रासलालसः, अजगरायमाणश्च अयम् आलमगीरः लोलजिह्वः फूत्कुर्वाणश्च अस्माकं द्वारदेशम् अधितिष्ठति। अस्य अजगरस्य शीर्षभङ्गः केन शिलाप्रहारेण कर्तव्यः इत्येतत् चिन्तनीयम् उत तस्यैव मुखे वर्तमानस्य ग्रासस्य कृते भ्रातृकलहः ?

(B) Answer any **one** of the following :— 10

खालीलपैकी कोणत्याही **एकाचे** उत्तर लिहा :—

निम्नलिखित में से किसी **एक** का उत्तर लिखिए :—

(i) Write the importance of दान.

दानाचे महत्व वर्णन करा.

दान का महत्व वर्णन कीजिए।

(ii) Write the summary of 'एकबुद्धिरहम्'.

"एकबुद्धिरहम्" पाठाचा सारांश लिहा.

"एकबुद्धिरहम्" पाठ का सारांश लिखिए।



http://www.sgbaonline.com/

http://www.sgbauonline.com/

2. (A) Translate any **two** of the following :— 10

खालीलपैकी कोणत्याही **दोन** श्लोकांचा अनुवाद करा :—

निम्नलिखित में से किन्हीं दो का अनुवाद कीजिए :—

(i) भुक्तिं च मुक्तिं प्रददाति तुष्टो भक्तिप्रियो यो निजविह्नहा च।
भक्त्या विहीनाय ददाति विघ्नांस्तं विघ्नराजं प्रणमामि नित्यम्।।

(ii) अलब्ध्वा यदि लब्ध्वा नानुशोचति पण्डित:।
अनान्तर्ये चारभते न प्राणानां धनायते।।

(iii) नाशिकक्षेत्रे स्थितरामक्षेत्रम्
बहिष्कृतै: नास्ति प्रवेशनीयम्।
स्वर्णकानां प्रतिषेधनात्तद्
कृतं विमुक्तं दलसंगरेण।।

(iv) विद्वत्तया त्वं नकुलो द्वितीय:
वागखड्ग युद्धे निपुणेन चापि।
श्री सह्यदेव: समरे रिपुघ्न:
तवारित पिंडे खलु पांडवत्वम्।।

(B) Write short notes on (any **one**) :— 5

टिपा लिहा (कोणत्याही **एक** वर) :—

टिप्पणी लिखिए (किसी **एक** पर) :—

(1) गणेश स्तुति

(2) विदूला उपदेश

(3) भीममंजीरी

3. (A) Translate any **one** of the following :— 10

खालीलपैकी कोणत्याही **एकाचा** अनुवाद करा :—

निम्नलिखित में से किसी **एक** का अनुवाद कीजिए :—

(i) क्षीरनीरस्य परस्परमेव सुयुक्तेभवत: यत् एकस्मात् अपरं पृथक् कर्तुं न शक्यते। एवं ययो: द्वयो: मध्ये एकरूपता वा अविच्छेसंबन्धो वा भवेत् तर्हि क्षीरनीरे इव तौ संयुक्तौ इति कथ्यते। नीरक्षीरन्यायोऽपि एतद् दर्शक:।

अलङ्कारशास्त्रे संकरनामकस्य अलङ्कारस्य स्पष्टीकरणार्थम् अस्य न्यायस्य प्रयोग क्रियते। तथा नीरक्षीरञ्च परस्परम् अतीव एकरूपता प्राप्तं तथा अलङ्कारद्वयमपि परस्परं संमिश्रितं चेत् संकरालङ्करो भवति एवं समवाय संबन्धेन अलङ्कारद्वयस्य मिश्रणं सङ्कार इति, पृथक्करणयोग्यरूपेण मिश्रणं संसृष्टि: इति च अलङ्कारशास्त्रे कश्यते।

यथा हंस नीरमिश्रितात् दुग्धात् नीरं पृथक्कृत्य क्षीरमेव स्वीकरोति तथा जीवने दु:खसंमिश्रितात् सुखात् दु:खं पृथक्कृत्य हितकारकमेव मनुज: गृह्णीयात् इति अनेन न्यायेन सूच्यते।

(ii) प्राचीन संस्कृत ग्रन्थेषु महर्षिभारद्वाजविरचित: 'यन्त्रसर्वस्वम्' नाम ग्रन्थ: अपि विमानविषयक: एव। अयं ग्रन्थ: अचिरात् एव प्रकाशं गत:। अस्य ग्रन्थस्य संशोधनं कर्तुम् अर्वाचीना: संशोधका: उद्युक्ता इति श्रूयते। अस्मिन ग्रन्थे सूत्राणां पञ्चशतानि विद्यन्ते इति इदानीमेव वृत्तपत्रादिषु प्रकाशं गतम्। तथैव नारदविरचित: कोऽपि ग्रन्थ: शिल्पशास्त्रविषयक: गवेषणपण्डितानां हस्तगत: इति श्रूयते। एतेषां ग्रंथानां परिचयेन प्राचीनपण्डितै: भौतिकविद्यायां कीदृशी प्रगति: साधिता आसीत् इति ज्ञायते। सद्य: काले पाश्चात्यशास्त्राणां प्रचारेण व्यामोहिता: भारतीया: संस्कृतभाषायां केवलं अध्यात्मविषयकं साहित्यव्याकरणादि विषयकमेव वा ज्ञानं विद्यते, भौतिकविद्याया: लेशोपि न तत्र विद्यते इत्यत: संस्कृतभाषाया: अध्ययनं व्यर्थं समर्थयन्ति। परं यदा यदा अगस्त्यसंहितासदृशा: केचन ग्रन्था: प्रकाशनं यान्ति तदा तदा एतेषां श्रद्धाहीनानां व्यामोहनिरास: अनायासेनैव भवति। अगस्त्यसंहितासदृशानां ग्रन्थानाम् अनाकलनीयम् अलौकिकत्वं ज्ञात्वा संस्कृतभाषाध्ययनम् आवश्यकम् इति सद्यस्तना अपिमन्यन्ते।



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(B) Answer any **one** of the following :— 10

खालीलपैकी कोणत्याही **एकाचे** उत्तर लिहा :—

निम्नलिखित में से किसी **एक** का उत्तर दीजिए :—

(i) Write in short about "भारतीयानाम् एकात्मता"।

"भारतीयानाम् एकात्मता" या विषयी थोडक्यात लिहा.

"भारतीयानाम् एकात्मता" के बारे में संक्षेप में लिखिए।

(ii) Write in short about "अध्यारोपापवाद न्याय"।

"अध्यारोपापवाद न्याय" या विषयी थोडक्यात लिहा.

"अध्यारोपापवाद न्याय" के बारे में संक्षेप में लिखिए।

4. (A) Translate any **two** of the following :— 10

खालीलपैकी कोणत्याही **दोन** चा अनुवाद करा :—

निम्नलिखित में से किन्हीं **दो** का अनुवाद कीजिए :—

(i) श्रुत्वा तदीयं वचनं विषाक्तम्

मरुतानि वाक्यं सहसागतं तत्।

धनं महारावपदे स्थितं मे

लता हि रम्या निजपादपेन।।

(ii) परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्।

यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः।।

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः

सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च।।

(iii) जनकस्य कुले जाता देवमायेव निर्मिता।

सर्वलक्षणसम्पन्ना नारीणामुत्तमा वधू।।

सीताप्यनुगता रामं शशिनं रोहिणी यथा।

पौरैरनुगतो दूरं पित्रा दशरथेन च।।

(iv) केशवं पतितं दृष्ट्वा पाण्डवा हर्ष निर्भराः।

रुरुरू: कौरवाः सर्वे हा हा केशव केशव।।

कस्तूरी जायते कस्मात्को हन्ति करिणां कुलम्।

किं कुर्यात्कातरो युद्धे को मृगासिंह : पलायनम्।।

(B) Write short note on (any **one**) :— 5

टिपा लिहा (कोणत्याही **एकावर**) :—

टिप्पणी लिखिए (किसी **एक** पर) :—

(i) समस्याख्यानम्

(ii) त्रिगुणवर्णनम्

(iii) पत्नीधर्मः।



http://www.sgbauonline.com/

http://www.sgbauonline.com/

http://www.sgbauonline.com/